# kAmagItA

# કામગીતા

## Document Information

Text title : kAmagItA

File name : kAmagItA.itx

Category : giitaa, gItA

Location : doc_giitaa

Latest update : December 23, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

# કામગીતા

Mahabharata - Ashvamedhika Parva 14.13
કામસ્ય શક્તિકથનેન દુર્જયત્વકથનપૂર્વકં તજ્જયોપાયકથનમ્ ।

વાસુદેવ ઉવાચ ।
ન બાહ્યં દ્રવ્યમુત્સૃજ્ય સિદ્ધિર્ભવતિ ભારત ।
શારીરં દ્રવ્યમુત્સૃજ્ય સિદ્ધિર્ભવતિ વા ન વા ॥ ૧॥

બાહ્યદ્રવ્યવિમુક્તસ્ય શારીરેષુ ચ ગૃહ્યતઃ ।
યો ધર્મો યત્સુખં ચૈવ દ્વિષતામસ્તુ તત્તવ ॥ ૨॥

દ્વ્યક્ષરસ્તુ ભવેન્મૃત્યુસ્ત્ર્યક્ષરં બ્રહ્મ શાશ્વતમ્ ।
મમેતિ દ્વ્યક્ષરો મૃત્યુર્નમમેતિ ચ શાશ્વતમ્ ॥ ૩॥

બ્રહ્મમૃત્યૂ તતો રાજન્નાત્મન્યેવ વ્યવસ્થિતૌ ।
અદૃશ્યમાનૌ ભૂતાનિ યોધયેતામસંશયમ્ ॥ ૪॥

અવિનાશોઽસ્ય તત્ત્વસ્ય નિયતો યદિ ભારત ।
ભિત્ત્વા શરીરં ભૂતાનામહિંસાં પ્રતિપદ્યતે ॥ ૫॥

લબ્ધ્વા હિ પૃથિવીં કૃત્સ્નાં સહસ્થાવરજઙ્ગમામ્ ।
મમત્વં યસ્ય નૈવ સ્યાત્કિં તયા સ કરિષ્યતિ ॥ ૬॥

અથવા વસતઃ પાર્થ વને વન્યેન જીવતઃ ।
મમતા યસ્ય વિત્તેષુ મૃત્યોરાસ્યે સ વર્તતે ॥ ૭॥

બ્રાહ્યાન્તરાણાં શત્રૂણાં સ્વભાવં પશ્ય ભારત ।
યન્ન પશ્યતિ તદ્ભૂતં મુચ્યતે સ મહાભયાત્ ॥ ૮॥

કામાત્માનં ન પ્રશંસન્તિ લોકે નેહાકામા કાચિદસ્તિ પ્રવૃત્તિઃ ।
સર્વે કામા મનસોઽઙ્ગ પ્રભૂતા યાન્પણ્ડિતઃ સંહરતે વિચિન્ત્ય ॥ ૯॥

ભૂયોભૂયો જન્મનોઽભ્યાસયોગાદ્યોગી યોગં સારમાર્ગં વિચિન્ત્ય ।

દાનં ચ વેદાધ્યયનં તપશ્ચ કામ્યાનિ કર્માણિ ચ વૈદિકાનિ ॥ ૧૦॥

વ્રતં યજ્ઞાન્નિયમાન્ધ્યાનયોગાન્કામેન યો નારભતે વિદિત્વા ।
યદ્યચ્ચાયં કામયતે સ ધર્મો નયો ધર્મો નિયમસ્તસ્ય મૂલમ્ ॥ ૧૧॥ યદ્યદ્ધ્યયં

અત્ર ગાથાઃ કામગીતાઃ કીર્તયન્તિ પુરાવિદઃ ।
શૃણુ સઙ્કીર્ત્યમાનાસ્તા અખિલેન યુધિષ્ઠિર ।
કામ ઉવાચ ।
નાહં શક્યોઽનુપાયેન હન્તું ભૂતેન કેનચિત્ ॥ ૧૨॥

યો માં પ્રયતતે હન્તું જ્ઞાત્વા પ્રહરણે બલમ્ ।
તસ્ય તસ્મિન્પ્રહરણે પુનઃ પ્રાદુર્ભવામ્યહમ્ ॥ ૧૩॥

યો માં પ્રયતતે હન્તું યજ્ઞૈર્વિવિધદક્ષિણૈઃ ।
જઙ્ગમેષ્વિવ ધર્માત્મા પુનઃ પ્રાદુર્ભવામ્યહમ્ ॥ ૧૪॥

યો માં પ્રયતતે હન્તું વેદૈર્વેદાન્તસાધનૈઃ ।
સ્થાવરેષ્વિવ ભૂતાત્મા તસ્ય પ્રાદુર્ભવામ્યહમ્ ॥ ૧૫॥

યો માં પ્રયતતે હન્તું ધૃત્યા સત્યપરાક્રમઃ ।
ભાવો ભવામિ તસ્યાહં સ ચ માં નાવબુધ્યતે ॥ ૧૬॥

યો માં પ્રયતતે હન્તું તપસા સંશિતવ્રતઃ ।
તતસ્તપસિ તસ્યથ પુનઃ પ્રાદુર્ભવામ્યહમ્ ॥ ૧૭॥

યો માં પ્રયતતે હન્તું મોક્ષમાસ્થાય પણ્ડિતઃ ।
તસ્ય મોક્ષરતિસ્થસ્ય નૃત્યામિ ચ હસામિ ચ ।
અવધ્યઃ સર્વભૂતાનામહમેકઃ સનાતનઃ ॥ ૧૮॥

તસ્માત્ત્વમપિ તં કામં યજ્ઞૈર્વિવિધદક્ષિણૈઃ ।
ધર્મે કુરુ મહારાજ તત્ર તે સ ભવિષ્યતિ ॥ ૧૯॥

(યજસ્વ વાજિમેધેન વિધિવદ્ દક્ષિણાવતા ।
અન્યશ્ચ વિવિધૈર્યજ્ઞૈઃ સમૃદ્ધ્યૈરાપ્તદક્ષિણૈઃ ॥)
મા તે વ્યથાઽસ્તુ નિહતાન્બન્ધૂન્વીક્ષ્ય પુનઃપુનઃ ।
ન શક્યાસ્તે પુનર્દ્રષ્ટું યેઽહતાસ્મિન્નરણાજિરે ॥ ૨૦॥

સ ત્વમિષ્ટ્વા મહાયજ્ઞૈઃ સમૃદ્ધૈરાપ્તદક્ષિણૈઃ ।
કીર્તિં લોકે પરાં પ્રાપ્ય ગતિમગ્ર્યાં ગમિષ્યસિ ॥ ૨૧॥

ઇતિ શ્રીમન્મહાભારતે અશ્વમેધપર્વણિ
કૃષ્ણધર્મરાજસંવાદે ત્રયોદશોઽધ્યાયે કામગીતા સમાપ્તા ॥ ૧૩ ॥

Verses 14.13.1 to 14.13.21

*kAmagItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*